# shrIvedavyAsAShTottaranAmastotram 4

# શ્રીવેદવ્યાસાષ્ટોત્તરનામસ્તોત્રમ્ ૪

## Document Information

Text title : Vedavyasa Ashtottaranamavali 4 by Yoganandasarasvati

File name : vedavyAsAShTottaranAmastotram4.itx

Category : aShTottarashatanAma, deities_misc

Location : doc_deities_misc

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : September 18, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીવેદવ્યાસાષ્ટોત્તરનામસ્તોત્રમ્ ૪

યં વેદશાસ્ત્રપરિનિષ્ઠિતશુદ્ધબુદ્ધિં
ચર્મામ્બરં સુરમુનીન્દ્રનુતં પ્રસન્નમ્ ।
કૃષ્ણત્વિષં કનકપિઙ્ગજટાકલાપં
વ્યાસં નમામિ શિરસા તિલકં મુનીનામ્ ॥

અવિદ્યાતિમિરાદિત્યં બ્રહ્મવિદ્યાવિશારદમ્ ।
શારદાશઙ્કરાત્માનં ભારતીતીર્થમાશ્રયે ॥

ૐ વેદવ્યાસો વિષ્ણુરૂપઃ પારાશર્યસ્તપોનિધિઃ ।
સત્યસન્ધઃ પ્રશાન્તાત્મા વાગ્મી સત્યવતીસુતઃ ॥ ૧ ॥

કૃષ્ણદ્વૈપાયનો દાન્તો બાદરાયણસંજ્ઞિતઃ ।
બ્રહ્મસૂત્રગ્રથિતવાન્ ભગવાઞ્જ્ઞાનભાસ્કરઃ ॥ ૨ ॥

સર્વવેદાન્તતત્ત્વજ્ઞઃ સર્વજ્ઞો વેદમૂર્તિમાન્ ।
વેદશાખાવ્યસનકૃત્કૃતકૃત્યો મહામુનિઃ ॥ ૩ ॥

મહાબુદ્ધિર્મહાસિદ્ધિર્મહાશક્તિર્મહાદ્યુતિઃ ।
મહાકર્મા મહાધર્મા મહાભારતકલ્પકઃ ॥ ૪ ॥

મહાપુરાણકૃજ્જ્ઞાની જ્ઞાનવિજ્ઞાનભાજનમ્ ।
ચિરઞ્જીવી ચિદાકારશ્ચિત્તદોષવિનાશકઃ ॥ ૫ ॥

વાસિષ્ઠઃ શક્તિપૌત્રશ્ચ શુકદેવગુરુર્ગુરુઃ ।
આષાઢપૂર્ણિમાપૂજ્યઃ પૂર્ણચન્દ્રનિભાનઃ ॥ ૬ ॥

વિશ્વનાથસ્તુતિકરો વિશ્વવન્દ્યો જગદ્ગુરુઃ ।
જિતેન્દ્રિયો જિતક્રોધો વૈરાગ્યનિરતઃ શુચિઃ ॥ ૭ ॥

જૈમિન્યાદિસદાચાર્યઃ સદાચારસદાસ્થિતઃ ।
સ્થિતપ્રજ્ઞઃ સ્થિરમતિઃ સમાધિસંસ્થિતાશયઃ ॥ ૮ ॥

પ્રશાન્તિદઃ પ્રસન્નાત્મા શઙ્કરાર્યપ્રસાદકૃત્ ।
નારાયણાત્મકઃ સ્તવ્યઃ સર્વલોકહિતે રતઃ ॥ ૯ ॥

અચતુર્વદનબ્રહ્મા દ્વિભુજાપરકેશવઃ ।
અભાલલોચનશિવઃ પરબ્રહ્મસ્વરૂપકઃ ॥ ૧૦ ॥

બ્રહ્મણ્યો બ્રાહ્મણો બ્રહ્મી બ્રહ્મવિદ્યાવિશારદઃ ।
બ્રહ્માત્મૈકત્વવિજ્ઞાતા બ્રહ્મભૂતઃ સુખાત્મકઃ ॥ ૧૧ ॥

વેદાબ્જભાસ્કરો વિદ્વાન્ વેદવેદાન્તપારગઃ ।
અપાન્તરતમોનામા વેદાચાર્યો વિચારવાન્ ॥ ૧૨ ॥

અજ્ઞાનસુપ્તિબુદ્ધાત્મા પ્રસુપ્તાનાં પ્રબોધકઃ ।
અપ્રમત્તોઽપ્રમેયાત્મા મૌની બ્રહ્મપદે રતઃ ॥ ૧૩ ॥

પૂતાત્મા સર્વભૂતાત્મા ભૂતિમાન્ભૂમિપાવનઃ ।
ભૂતભવ્યભવજ્ઞાતા ભૂમસંસ્થિતમાનસઃ ॥ ૧૪ ॥

ઉત્ફુલ્લપુણ્ડરીકાક્ષઃ પુણ્ડરીકાક્ષવિગ્રહઃ ।
નવગ્રહસ્તુતિકરઃ પરિગ્રહવર્જિતઃ ॥ ૧૫ ॥

એકાન્તવાસસુપ્રીતઃ શમાદિનિલયો મુનિઃ ।
એકદન્તસ્વરૂપેણ લિપિકારી બૃહસ્પતિઃ ॥ ૧૬ ॥

ભસ્મરેખાવિલિપ્તાઙ્ગો રુદ્રાક્ષાવલિભૂષિતઃ ।
જ્ઞાનમુદ્રાલસત્પાણિઃ સ્મિતવક્ત્રો જટાધરઃ ॥ ૧૭ ॥

ગભીરાત્મા સુધીરાત્મા સ્વાત્મારામો રમાપતિઃ ।
મહાત્મા કરુણાસિન્ધુરનિર્દેશ્યઃ સ્વરાજિતઃ ॥ ૧૮ ॥

ઇતિ શ્રીયોગાનન્દસરસ્વતીવિરચિતં
શ્રીવેદવ્યાસાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sunder Hattangadi

*shrIvedavyAsAShTottaranAmastotram 4*
pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*